# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) | **प्रश्नपत्रम् – ४** | |
|---|---|---|
| विषयः – संस्कृतसम्भाषणम् | (O.E.-1.1.1.) | गुणाः – ७० |
| दिनाङ्कः – १८/१२/२०१८ | *(ग्रन्थः –प्रथमदिक्षा)* | समयः –०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ दश रिक्तस्थानानि पूरयत ।** **( १० )**

*(एषः, एषा, एतत् )* *(सः, सा, तत्)*

*(१)* ________ *मन्दिम्।* *(७)* ________ *भवनम्।*

*(२)* ________ *शिक्षकः।* *(८)* ________ *अध्यापिका।*

*(३)* ________ *महिषी।* *(९)* ________ *मयूरः।*

*(४)* ________ *पुष्पम्।* *(१०)* ________ *फलम्।*

*(५)* ________ *सिंहः।* *(११)* ________ *वृक्षः।*

*(६)* ________ *छात्रा।* *(१२)* ________ *छात्रा।*

**प्रश्नः २ कानि अपि दश पदानि उपयुज्य वाक्यानि रचयत ।** **( १० )**

*(१) एषः* *(२) किम्* *(३) कौ*

*(४) का* *(५) कः* *(६) अहम्*

*(७) वयम्* *(८) युवाम्* *(९) भवान्*

*(१०) भवन्तः* *(११) भवत्यः* *(१२) आवाम्*

**द्वितीयान्वितिः**

**प्रश्नः ३ कानिचिद् दश द्वितीयाबहुवचने शुद्धानि कृत्वा लिखत ।** **( १० )**

**उदाहरणम् –** *सः ग्रन्थः पठति ⇨ सः ग्रन्थान् पठति।*

*(१) जनकः विद्यालयः गच्छति।* *(७) नलिनी नगरी पश्यति।*

*(२) महिला घटी नयति।* *(८) अहं देवः नमामि।*

*(३) जननी रोटिका खादति।* *(९) सा शाकः क्रीणाति।*

*(४) शुकः आम्रः खादति।* *(१०) लेखकः पत्रः लिखति।*

*(५) ऋषिः वेदः पाठयति।* *(११) आरक्षकः चौरः ताडयति।*

*(६) भक्तः देवः पश्यति।* *(१२) बालिका ताम्बूलः खादितवती।*

**प्रश्नः ४ अधोनिर्दिष्टान् धातून् उपयुज्य वर्तमानकाले कानिचिद् दश वाक्यानि रचयत ।** **( १० )**

*उहारणम् :- क्रीधातुः (१)राधा आभूषणानि क्रीणाति।*

*(२) मोहनः नूतनानि वस्त्राणि क्रीणाति।*

(१) ज्ञाधातुः (२) कृधातुः (३) दा धातुः

(४) श्रुधातुः (५) ग्रह् धातुः

## तृतीयान्वितिः

**प्रश्नः ५ उदाहरणानुसारं भूतकालवाक्यानि लिखत ।** **( १० )**

**उदाहरणम् :-** *बालकः पुस्तकं पठति। ⇨ बालकः पुस्तकम् अपठत्।*

(१) बालिका पत्रं लिखति।

(२) भवान् श्लोकं वदति।

(३) सा फलरसं पिबति।

(४) एषा घटीं पश्यति।

(५) अध्यापकः व्याकरणं पाठयति।

(६) माता शाकं कर्त्तयति।

(७) सः कार्यालयं गच्छति।

(८) पुष्पाणि शुष्यन्ति।

(९) भक्ताः देवं नमन्ति।

(१०) सेवकः लते सिञ्चति।

(११) खलः सज्जनं निन्दति।

(१२) क्रीडापटू क्रीडतः।

**प्रश्नः ६ अधोदत्तेषु कानिचन दश वाक्यानि क्तवत्वन्तानि कृत्वा लिखत ।** **( १० )**

**उदाहरणम् :-** *जनाः नृपम् अस्तुवन् । ⇨ जनाः नृपं स्तुतवन्तः।*

(१) वैद्यः रुग्णम् अपृच्छत्।

(२) अहं शालाम् अगच्छम्।

(३) जननी पुत्रीम् अवदत्।

(४) त्वं बालम् अनयः।

(५) बालिकाः वृक्षम् अपश्यन्।

(६) यूयं पुराणानि अपठत।

(७) राक्षसौ आञ्जनेयम् अपश्यताम्।

(८) महिले पुष्पम् अधरताम्।

(९) एषः पुष्पम् अस्पृशत्।

(१०) वयं शैलम् अपश्याम।

(११) आवां देवम् अस्मराव।

(१२) पुत्री जननीम् अस्मरत्।

**प्रश्नः ७ निर्देशानुसारं कुरुत ।** **( १० )**

(१) सूर्यौ ____________________। (एषः, एषा, एतौ)

(२) एषः भल्लूकः। (एतस्य प्रश्नवाक्यं कुरुत )

(३) देवः कृपां करोति। (बहुवचने परिवर्तयत)

(४) वयम् उद्यानपालकाः। (द्विवचने परिवर्तयत )

(५) त्वं बालकः असि। (बहुवचने परिवर्तयत )

(६) भवान् _____ ______ । (द्वितीयाद्विवचन- बहुवननान्तैः रुपैः रिक्तस्थाने पूरयत)

(७) भवत्यौ ____________________ स्तः । (गृहिणी)

(८) पाठशालाम् ____________ ___________ । (रिक्तस्थाने पूरयत)

(९) युवां पाकं __________ । (कृधातुः)

(१०) सौचिकौ सीव्यतः। (लोटि परिवर्तयत )

(११) कुक्कुरः भषति। (भूतकाले परिवर्तयत )

(१२) देवी असुरम् अमारयत् (क्तवतुप्रत्येन परिवर्तयत )

--००--